# Vikata Stuti by Kamasura

# વિકટસ્તુતિઃ કામાસુરેણ પ્રોક્તમ્

## Document Information

Text title : Vikata Stuti by Kamasura

File name : vikaTastutiHkAmAsureNaproktam.itx

Category : ganesha

Location : doc_ganesha

Transliterated by : Ajit Krishnan

Proofread by : Ajit Krishnan, PSA Easwaran

Description/comments : Mudgalapurana, Khanda 6, Adhyaya 34

Latest update : April 23, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# વિકટસ્તુતિઃ કામાસુરેણ પ્રોક્તમ્

કામઃ કરપુટં કૃત્વા ત્યક્ત્વા શસ્ત્રાદિકં પુરઃ ।
વિકટં પ્રણનામાથ હર્ષયુક્તસ્વભાવતઃ ॥ ૩૨॥

પ્રણમ્ય પૂજયામાસ પુનર્યત્નેન વિઘ્નપમ્ ।
તુષ્ટાવ ભક્તિસંયુક્તોઽસુરઃ કામો ગજાનનમ્ ॥ ૩૩॥

કામાસુર ઉવાચ -
નમસ્તે વિકટાયૈવ ગણેશાય પરાત્મને ।
સર્વપૂજ્યાય સર્વેશ! દેવાસુરમયાય ચ ॥ ૩૪॥

અનન્તમાયયાયુક્ત! બ્રહ્મભૂતસ્વરૂપિણે ।
ગજાનનાય હેરમ્બ! દેવેશાય નમો નમઃ ॥ ૩૫॥

શૂર્પકર્ણાય વિઘ્નાનાં ચાલકાય નમો નમઃ ।
ભક્તાનાં વિઘ્નહર્ત્રે તે હ્યભક્તાનાં વિનાશિને ॥ ૩૬॥

સ્વાનન્દવાસિને તુભ્યં યોગાકારસ્વરૂપિણે ।
યોગિભ્યઃ શાન્તિદાત્રે તે યોગેશાય નમો નમઃ ॥ ૩૭॥

અનામયાય સર્વાદિપૂજ્યાય જ્યેષ્ઠરૂપિણે ।
જ્યેષ્ઠેભ્યઃ પદદાત્રે તે જ્યેષ્ઠરાજાય વૈ નમઃ ॥ ૩૮॥

સિદ્ધિબુદ્ધિપ્રદાત્રે ચ સિદ્ધિબુદ્ધિવિહારિણે ।
સિદ્ધિબુદ્ધિસ્વરૂપાય ગણાનાં પતયે નમઃ ॥ ૩૯॥

ત્રિનેત્રાય નમસ્તુભ્યં ચતુર્બાહુધરાય ચ ।
લમ્બોદરાય બ્રહ્મેશ! બ્રહ્મણાં પતયે નમઃ ॥ ૪૦॥

દેવાનાં પાલકાયૈવ દૈત્યેભ્યો વરદાયિને ।
સર્વેષાં સમભાવાય ઢુણ્ઢિરાજાય તે નમઃ ॥ ૪૧॥

વિષ્ણુપુત્રાય શમ્ભોશ્ચ શક્તેઃ પુત્રાય કાશ્યપ! ।

વરેણ્યસૂનવે સર્વમાત્રે પિત્રે નમો નમઃ ॥ ૪૨॥

કિં સ્તૌમિ ત્વાં ગણાધીશ! યત્ર યોગીન્દ્રમુખ્યકાઃ ।
વેદાદયો વિશેષેણ શાન્તિં પ્રાપ્તાઃ સ્વભાવતઃ ॥ ૪૩॥

માયાસુખં વિશેષેણ ભ્રાન્તિદં સર્વજન્તવે ।
ત્યક્ત્વા તલ્લભ્યસે નાથ! ભક્ત્યા વિકટયા પ્રભો! ॥ ૪૪॥

અશાન્તં માયયા યુક્તં ચિત્તં ભ્રાન્તિયુતં સદા ।
વિકટે શાન્તિમાપન્નમતસ્ત્વં વિકટો મતઃ ॥ ૪૫॥

વિકટ ઉવાચ -
ત્વયા કૃતમિદં સ્તોત્રં સર્વકામપ્રદં ભવેત્ ।
શ‍ૃણ્વતે પઠતે ચૈવાન્તે સ્વાનન્દપ્રદાયકમ્ ॥ ૪૬॥

ઇતિ કામાસુરેણપ્રોક્તા વિકટસ્તુતિઃ સમાપ્તા । ૬.૩૪

Encoded by Ajit Krishnan
Proofread by Ajit Krishnan, PSA Easwaran

*Vikata Stuti by Kamasura*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*